# श्रीमद्भगवद्गीता पञ्चमोऽध्यायः संन्यासयोगः ।

1. पञ्चमोऽध्यायस्य नाम किम् ? संन्यासयोगः ।
2. निःश्रेयसकरौ उभौ कुतः? संन्यासः कर्मयोगश्च निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन ।
3. संन्यासः - कर्मणां परित्यागः ।
4. कर्मयोगः – कर्मणां शास्त्रीयानुनुष्ठानम्।
5. कर्मसंन्यासात् कर्मयोगो विशिष्यते कस्मात् ? यः न द्वेष्टि , न काङ्क्षति , सः नित्य –संन्यासी इति ज्ञेयः सः निर्द्वन्द्वः बन्धात् सुखम् प्रमुच्यते ।
6. निर्द्वन्द्वः – द्वन्द्ववर्जितः।
7. साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः एकस्यापि सम्यगनुष्ठानात् कथम् उभयोः फलं विन्दते ?
   यत् साङ्ख्यैः ज्ञाननिष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यम् , तत् योगैरपि ज्ञानप्राप्त्युपायत्वेन ईश्वरे समर्प्य कर्माणि आत्मनः फलम् अनभिसन्धाय अनुतिष्ठन्ति। अतः साङ्ख्यं च योगं च यः एकं पश्यति सः फलैकत्वात् सम्यक् पश्यतीत्यर्थः।
8. अयोगतः संन्यासः दुःखम् आप्नोति।
9. योग -युक्तः मुनिः न चिरेण ब्रह्म अधिगच्छति ।
10. सम्यग्ज्ञानप्राप्त्युपायत्वेन किं फलं लभ्यते? योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा कर्मकुर्वन्नपि न लिप्यते । सम्यग्दर्शी लोकसङ्ग्रहाय कर्म कुर्वन्नपि न कर्मभिः बध्यते इत्यर्थः।
11. योगेन युक्तः योगयुक्तः।
12. विशुद्धात्मा विशुद्धसत्त्वः।
13. विजितात्मा विजितदेहः।
14. सर्वभूतात्मभूतात्मा
    सर्वेषां ब्रह्मादीनां स्तम्बपर्यन्तानां भूतानाम् आत्मभूतः आत्मा प्रत्यक्चेतनो यस्य सः सर्वभूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः,
15. न स पापेन पद्मपत्रमिवाम्भसा - कः? यः सङ्गम् त्यक्त्वा कर्माणि , ब्रह्मणि आधाय करोति , सः पद्म पत्रम् अम्भसा इव , पापेन न लिप्यते । केवलं सत्त्वशुद्धिमात्रमेव फलं तस्य कर्मणः स्यात् इत्यर्थः।
16. योगिनः कथं कर्म कुर्वन्ति? योगिनः अपि सङ्गम् त्यक्त्वा कायेन , मनसा , बुद्ध्या , केवलैः इन्द्रियैः आत्मशुद्ध्यर्थं कर्म कुर्वन्ति।
17. युक्तः कर्मफलं त्यक्त्वा नैष्ठिकीम् शान्तिम् आप्नोति ।
18. अयुक्तः कामकारेण फले सक्तः निबध्यते ।
19. परमार्थदर्शी कथं प्रवर्तते ? सः नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं च तानि सर्वाणि कर्माणि मनसा संन्यस्य आस्ते सुखम् वशी नव -द्वारे पुरे देही न एव कुर्वन् न कारयन् ॥
20. सप्त शीर्षण्यानि आत्मनः उपलब्धिद्वाराणि, अवाक् द्वे मूत्रपुरीषविसर्गार्थे, तैः द्वारैः नवद्वारं पुरम् उच्यते शरीरम् ।
21. केन मुह्यन्ति जन्तवः? अज्ञानेनावृतं ज्ञानेन मुह्यन्ति जन्तवः।

22. आदित्यवत् केषां ज्ञानं प्रकाशयति ? येषाम् अज्ञानम् आत्मनः ज्ञानेन नाशितम् , तेषाम् ज्ञानम् आदित्यवत् परम् प्रकाशयति । यथा आदित्यः समस्तं रूपजातम् अवभासयति तद्वत् ज्ञानं परमार्थतत्त्वम् प्रकाशयति।

23. गच्छन्ति अपुनरावृत्तिं के? तत्बुद्धयः तदात्मानः तत्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति।

24. पण्डिताः परमार्थतत्त्वम् कथं दर्शयति? पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च श्वपाके च समम् एकम् अविक्रियं परमार्थतत्त्वम् तत् ब्रह्म इति दर्शयति।

25. ब्रह्मविद् ब्रह्मणि स्थितः – यः प्रियम् प्राप्य न प्रहृष्येत् , अप्रियम् प्राप्य च न उद्विजेत् तेषां तस्य प्रियाप्रियप्राप्त्यसम्भवात् ते स्थिरबुद्धिः असम्मूढः ते ब्रह्मवित् ब्रह्मणि स्थितः भवति अकर्मकृत् सर्वकर्मसंन्यासी इत्यर्थः ।

26. 'सर्वभूतेषु एकः समः निर्दोषः आत्मा' इति स्थिरा निर्विचिकित्सा बुद्धिः यस्य सः स्थिरबुद्धिः।

27. असंमूढः संमोहवर्जितः।

28. सुखमक्षयमश्नुते के? यः बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखम् विन्दति सः ब्रह्मयोगयुक्तात्मा अक्षयम् सुखम् अश्नुते । बाह्यविषयप्रीतेः क्षणिकायाः इन्द्रियाणि निवर्तयेत् आत्मनि अक्षयसुखार्थी इत्यर्थः

29. न तेषु रमते बुधः कुतः ? संस्पर्शजाः भोगाः दुःखयोनयः एव ते आद्यन्तवन्तः अविद्याकृतत्वात् अतः ज्ञानि इन्द्रियविषये न रमते ।

30. आद्यन्तवन्तः-आदि अन्तवन्तः

    आदिः विषयेन्द्रियसंयोगो भोगानाम् अन्तश्च तद्वियोग एव ; अतः आद्यन्तवन्तः अनित्याः, मध्यक्षणभावित्वात् इत्यर्थः ।

31. संस्पर्शजाः - विषयेन्द्रियसंस्पर्शेभ्यो जाताः भोगा भुक्तयः दुःखयोनय एव ते, अविद्याकृतत्वात् ।

32. स युक्तः स सुखी नरः कः ? इह एव शरीरविमोक्षणात् प्राक् यः काम -क्रोधोद्भवम् वेगम् सोढुम् शक्नोति सः नरः युक्तः सः सुखी च भवति ।

33. ब्रह्मणि स्थितः कथं ब्रह्म प्राप्नोति ? 24-29

34. संन्यासकर्मयोगयोः उभयोरपि असम्भवः कारणं विशदयत ?